# बालादर्शे त्रयोदशः पाठः ॥१३॥

## नक्षत्राणि

**यदा** **त्दा।** **कदा**

**तु।** **किन्तु।** **न।** **वत्।**

नक्षत्राणि कदा प्रकाशन्ते ? नक्षत्राणि रात्रौ प्रकाशन्ते। तानि दिवा न प्रकाशन्ते। मेघैः आवृते नभसि रात्रौ च न प्रकाशन्ते॥

यदा सूर्यः अस्तम् अयते तदा ताराणि प्रकाशन्ते। तनि व्योम्नि हीरवत् द्योतन्ते। नक्षत्राणां राजा चन्द्रः। चन्द्रस्य प्रकाशः चन्द्रिका। अहं नक्षत्राणि गणयामि। किन्तु तानि गणयितुं न पारयामि। तानि असङ्ख्यानि (असंख्यानि) वर्तन्ते। तत्र अश्विन्यादीनि सप्तविंशतिः नक्षत्राणि प्रधानानि॥

**क) प्रश्नाः - - - -**

१। नक्षत्राणि कुत्र प्रकाशन्ते ? नक्षत्राणि व्योम्नि रात्रौ प्रकाशन्ते।

२। तानि कदा न प्रकाशन्ते ? रात्रौ मेघैः आवृते नभसि नक्षत्राणि न प्रकाशन्ते।

३। तानि कुत्र हीरवत् द्योतन्ते ? तानि व्योम्नि हीरवत् द्योतन्ते।

४। केषां राजा चन्द्रः ? नक्षत्राणां राजा चन्द्रः।

५। तस्य प्रकाशस्य नाम किम् ? तस्य प्रकाशस्य नाम चन्द्रिका।

६। त्वं किं करोषि? अहं नक्षत्राणी गणयामि।

७। कानि गणयितुं न पारयसि ? तानि नक्षत्राणि गणयितुं न पारयमि।

८। कुतः गणयितुं न पारयसि ? तानि नक्षत्राणि असङ्ख्यानि वर्तन्ते।

९। प्रधान नक्षत्राणि कानि ? अश्विन्यादीनि प्रधान-नक्षत्राणि।

१०। कति ? अश्विन्यादीनि नक्षत्राणि सप्तविंशतिः।

**ख) ' त्वम् - - तव ' पदभ्यां यथा योगं वाक्यानि पूरयत - -**

१.____ नक्षत्राणि गणायसि। *त्वं* नक्षत्राणि गणायसि।

२. ____ पितरौ पुत्रीं लालयतः। *तव* पितरौ पुत्रीं लालयतः

**ग) ' लट् ' रूपैः वाक्यानि पूरयत - -**

१। वयं पीठेषु (उपविश्)। वयं पीठेषु उपविशामः।

२। अहं अङ्गुलीः (गण्)। अहं अङ्गुलीः गणयामिं।

३। तृणानि नक्षत्राणि च असङ्ख्यानि (अस्)। तृणानि नक्षत्राणि च असङ्ख्यानि सन्ति।

## शब्दसंग्रहः śabdasaṅgrahaḥ = Vocabulary

नक्षत्रं nakṣatraṁ = *n.* star

यदा yadā = *in.* when

तदा tadā = *in.* then

कदा kadā = *in.* when

तु , किन्तु tu , kintu = *in.* but

न na = *in.* no, not

वत् vat = *in.* lkie

प्रकाशन्ते prakāśante = *A.* they shine

आवृते āvṛte = *a.n.* covered with

व्योमन् vyoman= *n.* sky

हीरवत् hīravat = *in.* like a diamond

द्योतन्ते dyotante = *A.* shine

चन्द्रिका candrikā = *f* moonlight

गणयामि gaṇayāmi = *P.* I count

पारयामि pārayāmi = *P.* am able to

असङ्ख्यानि asaṅkhyāni = *n.* uncountable

अश्विन्यादीनि aśvinyādīni = *a.n.* beginning with star *Aśvinī*

नभस् nabhas = *n.* sky

सप्तविंशतिः saptaviṁśatiḥ = *f* twentyseven

अस्तम् अयते astam ayate = *A.* sets

करोषि karoṣi = *P.* you do

तारं tāraṁ = *n.* star